**अदृष्टपूर्व्व** त्रि० न पूर्वं दृष्टः सह सुपेति स० परनि० । पूर्व्वमदृष्टे । "अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वेति" गीता ।

**अदृष्टि** स्त्री विरुद्धा दृष्टिः विरोधार्थे अभावार्थे वा न०त० । क्रूरदृष्टौ, सरोषवक्रदृष्टौ, दर्शनाभावे च । ब० । दृष्टिशून्ये त्रि० ।

**अदेय** त्रि०न०त० । देयभिन्ने दानायोग्ये च । दानायोग्यञ्च पुत्रादि—"स्वं कुटुम्बाविरोधेन देयं दारसुतादृते नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतमिति" याज्ञ० "अन्वाहितं याचितकमाधिः साधारणञ्च यत् । निक्षेपः पुत्रदाराश्च सर्वस्वञ्चान्वये सति । आपत्स्वपि च कष्टासु वर्त्तमानेन देहिना । अदेयान्याहुराचार्य्या यच्चान्यस्मै प्रतिश्रुतम्" इत्येवं स्मृतिनिषिद्धदाने वस्तुनि "योऽदत्तं प्रतिगृह्णाति यश्चादेयं प्रयच्छतीति" तदादानमपि स्मृतौ निषिद्धम् । "मद्यमदेयमपेयमग्राह्यमिति" स्मृतिः ।

**अदेवत्र** त्रि० न देवान् त्रायते प्रीणाति अनेन त्रै—करणे क । देवप्रीणनासाधने अन्नादौ "अदेवत्रादराधस" इति श्रुतिः ।

**अदेवमातृक** पु० न०त० । देवमातृकदेशभिन्ने नदीवृष्ट्यम्बुसम्पन्नव्रीहिपालितदेशे । "वितन्वति क्षेममदेवमातृका" इति भार० । ["अयज्वानमदेवयुमिति" ऋ० ५,८,११ ।

**अदेवयु** त्रि० न देवं याति प्राप्नोति या—कु । देवाप्रापके ।

**अदेश** पु० न०त० । गर्हितदेशे अयोग्यदेशे च । "नादेशे तर्पणं कुर्य्यात् न सन्ध्यां नापि पूजनमिति" स्मृतिः । "स्त्रियं स्पृशेददेशे य" इति स्मृतिः । गर्हितदेशाश्च स्मृतौ दर्शिताः केचित् संगृह्यन्ते । "चातुर्वर्ण्यव्यवस्था तु यस्मिन् देशे न वर्त्तते । तं म्लेच्छदेशं जानीयादार्य्यावर्त्तं ततःपरम्" इति विष्णु० । "आनर्त्तकाङ्गमगधाः सुराष्ट्राः दक्षिणापथः । तथा च सिन्धुः सौवीरा एते सङ्कीर्णयोनय इति" "पद्भ्यां स कुरुते पापं यः कलिङ्गान् प्रपद्यते । ऋषयो निष्कृतिस्तस्य प्राहुर्वैश्वानरं हविरिति" बौधा० । "अङ्गवङ्गकलिङ्गांश्च तीर्थयात्रां विना व्रजन् । प्रायश्चित्तं प्रकुर्वीतेति" स्मृतिः । इष्टदेशेऽपि केचित् श्राद्धतर्पणादौ विशेषतोवर्ज्याः यथा "रूक्षं क्रमियुतं क्लिन्नं सङ्कीर्णानिष्टगन्धिकम् । देशं त्वनिष्टशब्दञ्च वर्ज्जयेत् श्राद्धकर्म्मणीति" । "न म्लेच्छविषये श्राद्धं कुर्य्यान्म्लेच्छेतु तं तथा नेष्टकाचरिते पितॄन् तर्पयेदिति" शङ्खलिखितौ । "परकीयगृहे यस्तु पितॄन् संतर्पयेद्यदि । तद्भूमिस्वामिनस्तस्य हरन्ति पितरो बलादिति" एवमन्येऽपि गर्ह्यत्वयोजकाः स्मृत्याद्युक्ता वेदितव्याः । "अदेशकाले यद्दानं—तद्दानं तामसं विदु"रिति गीता ।

**अदैव** न० दैवं वैश्वदेविकश्राद्धं तन्नास्ति यत्र । वैश्वदेविकश्राद्धशून्ये नित्यश्राद्धे । तस्य पार्वणेतिकर्त्तव्यतया वैश्वदेव श्राद्धप्राप्तौ "अदैविकन्तु तत् कार्य्यमिति" स्मृतौ पर्य्युदासान्नात्र वैश्वदैविकम् धिकं नित्यश्राद्धशब्दे वक्ष्यते । अदैविकमप्यत्र । दैवं भाग्यम् । तच्छून्ये, दुर्भाग्यवति च त्रि० ।

**अदोष** पु० दोषः स्मृत्युक्तदुरदृष्टसाधनत्वम् अभावार्थे न०त० । स्मृत्युक्तदुरदृष्टसाधनत्वदोषाभावे । न०ब० । दोषशून्ये त्रि० । अलङ्कारोक्तदोषशून्ययोः शब्दार्थयोः "तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापीति" काव्यप्र० । "अदोषं गुणवत् काव्यमिति" सरस्वतीक० ।

**अद्म** न० अद्यते देवैः अद—कर्म्मणि मन् । पुरोडाशे उज्ज्वलद० ।

**अद्धा** अव्य० अत्यते अत् तं सन्ततं गमनं ज्ञानं वा दधाति क्विप् । याथार्थ्ये, साक्षात्कारे, स्फुटे, अवधारणे, अतिशये च । "अद्धा श्रियं पालितसङ्गरायेति" रघुः । "यस्य स्यादद्धा न विचिकित्सास्तीति श्रुतिः । अयं स्वरादिः, चादिश्च तेनोभयस्वरता । साक्षादादिषु पाठात् अद्धाकृत्येत्यादौ समासे ल्यप् ।

**अद्भुत** न० अततीत्यत् अव्ययमाकस्मिकार्थे तथा भाति भा—डुतच् । आकस्मिके उल्कापातादौ, आलङ्कारिकप्रसिद्धे नवरसान्तर्गतविस्मयस्थायिभावके रसभेदे यथोक्तम् "अद्भुतो विस्मयस्थायिभावो गन्धर्व्वदैवतः ॥ पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् । गुणानां तस्य महिमा भवेदुद्दीपनं पुनः ॥ स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसम्भ्रमाः । तथा नेत्रविकासाद्या अनुभावाः प्रकीर्त्तिताः ॥ वितर्कावेगसम्भ्रान्तिहर्षाद्या व्यभिचारिणः इति" । यथा "दोर्द्दण्डाञ्चितचन्द्रशेखरधनुर्द्दण्डावभङ्गोद्यतटङ्कारध्वनिरार्य्यबालचरितप्रस्तावनाडिण्डिमः । द्राक्पर्य्यस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदरभ्राम्यत्पिण्डितचण्डिमा कथमहो ? नाद्यापि विश्राम्यति" इति ॥ तद्वति त्रि० । "कम्पाद्यद्भुतसम्प्राप्ते इति" ज्योति० । अद्भुतस्वरूपविभागादि "प्रकृतिविरुद्धमद्भुतवचनन् प्रकृतिविरुद्धमद्भुतमापदः प्राक् प्रबोधाय देवाः सृजन्तीति" ज्योतिषतत्त्वे आथर्वणवाक्ये । "आपजन्तानाय भूमग्रादीनां पूर्व्वं स्वभावप्रच्याव: देवकर्तृकोऽद्भुत" इति रघु० । तेषां त्रैविध्यादि अग्न्युत्पात शब्दे उक्तम् । "उदयति स्म तदद्भुतमालिभिरिति" नैष० । "तमद्भुतं बालकमम्बुजेक्षणमिति" भाग० ।

**अद्भुतस्वन** पु० अद्भुतः स्वनो यस्य ब० । महादेवे । कर्म्म० । आश्चर्य्यशब्दे । ब० । तथा भूतशब्दवति त्रि० ।